# Shri Anantatattva Amritam

# શ્રીઅનન્તતત્ત્વામૃતમ્

## Document Information

Text title : Ananta Tattva Amritam

File name : anantatattvAmRRitam.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : naraharyAnandAchArya

Proofread by : Aaditya Kalyanaraman

Description/comments : From Chatuh Sampraday Dig-Darshan

Latest update : November 10, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 10, 2023

*sanskritdocuments.org*

# શ્રીઅનન્તતત્ત્વામૃતમ્

રામં સૂત્રકૃતં વ્યાસં વૃત્તિકૃત્પુરુષોત્તમમ્ ।
આનન્દભાષ્યકૃદ્રામાનન્દાચાર્યં નમામ્યહમ્ ॥ ૧॥

પૂર્વાચાર્યાન્ નમસ્કૃત્યાનન્તાનન્દં ગુરું તથા ।
કુર્વેઽનન્તપદં પ્રાપ્તું શ્રીઅનન્તતત્ત્વામૃતમ્ ॥ ૨॥

પ્રમાણપ્રતિપન્નં હિ વસ્તુ તત્ત્વતયોચ્યતે ।
ચિદચિદીશભેદાત્ તત્ ત્રિધા નિત્યં તથાઽમૃષા ॥ ૩॥

"સર્વં ખલ્વિદમે" તસ્ય, "સદેવે" ત્યાદિકસ્ય ચ ।
પ્રામાણ્યાદ્ બ્રહ્મ શ્રીરામો વિશિષ્ટો હિ ચિતાઽચિતા ॥ ૪॥

વિજ્ઞેયશ્ચિત્પદાર્થો હિ જીવોઽણુશ્ચેતનસ્તથા ।
બદ્ધમુક્તવિભેદાત્ સ જીવાત્મા દ્વિવિધો મતઃ ॥ ૫॥

કર્મમુક્તશ્ચ મુક્તોઽથ બદ્ધો બદ્ધો હિ કર્મણા ।
અચિદચેતનો જ્ઞેયો પ્રકૃત્યાદિચતુર્વિધા ॥ ૬॥

ઉપાદાનં નિમિત્તં ચ જગતો બ્રહ્મ નિશ્ચિતમ્ ।
તત્રાવસ્થાશ્રયો દ્રવ્યમુપાદાનં પ્રકીર્તિતમ્ ॥ ૭॥

નિમિત્તં ચાથ સમ્પ્રોક્તં તત્ત્વં કાર્યવિધાયકમ્ ।
"યતો વે'ત્યાદિતો બ્રહ્મ જગતઃ કારણદ્વયમ્ ॥ ૮॥

સ્થૂલાચિચ્ચિદ્વિશિષ્ટં હિ બ્રહ્મૈવ રાઘવો જગત્ ।
વિશેષ્યો રાઘવસ્તત્ર ચિદચિત્તૌ વિશેષણે ॥ ૯॥

અપૃથક્સિદ્ધધાર્યત્વાચ્છેષત્વાચ્ચિદચિદ્દ્વયમ્ ।
રામસ્ય બ્રહ્મણો યસ્માચ્છરીરં સમ્મતં બુધૈઃ ॥ ૧૦॥

લીલાવિભૂતિભૂતાનિ બ્રહ્માણ્ડાન્યખિલાનિ ચ ।
બ્રહ્મણઃ પાદમાત્રાણિ "પાદોઽસ્ય વિશ્વે॑તિશ્રુતેઃ ॥ ૧૧॥

દિવ્યધામ્નસ્તુ વિજ્ઞેયા બ્રહ્મત્રિપાદરૂપતા ।
સાકેતમુક્તિધામાદિ તસ્ય નામાન્તરં મતમ્ ॥ ૧૨॥

સૂક્ષ્માચિચ્ચિદ્વિશિષ્ટં હિ કારણં બ્રહ્મ ગદ્યતે ।
સૂક્ષ્મતાઽચિચ્ચિદોરત્ર નામરૂપાવિભાગિતા ॥ ૧૩॥

વિકારસ્તુ સ્વરૂપેઽથ સ્વભાવે ચાચિતો મતઃ ।
સૃષ્ટૌ ચિતો મતઃ સોઽથ સ્વભાવ એવ કેવલમ્ ॥ ૧૪॥

બ્રહ્મણશ્ચ સ્વરૂપેઽથ સ્વભાવે વિકૃતિર્ન હિ ।
હેયપ્રતિભટો બ્રહ્મ રામઃ સદ્ગુણસાગરઃ ॥ ૧૫॥

સચ્ચિદાનન્દરૂપં તદ્ “સત્યં જ્ઞાનમિ” તિશ્રુતે ।
જ્ઞાનશક્તિબલૈશ્વર્યવીર્યતેજાંસિ તદ્ગુણાઃ ॥ ૧૬॥

સ્વાભાવિકગુણાશ્ચૈતે તસ્ય ભગપદેરિતાઃ ।
સર્વજ્ઞઃ સર્વશક્તિશ્ચ સર્વવ્યાપી ચ રાઘવઃ ॥ ૧૭॥

પરશ્ચ વિભવો વ્યૂહોઽન્તર્યામી ચાથ પઞ્ચમઃ ।
ભેદશ્ચાર્ચાવતારો હિ રામસ્ય બ્રહ્મણો મતઃ ॥ ૧૮॥

શ્રીરામશ્ચ બુધૈઃ પ્રોક્તઃ સાકેતસ્થઃ પરેશ્વરઃ ।
વાસુદેવાદયો વ્યૂહા મત્સ્યાદ્યા વિભવા મતાઃ ॥ ૧૯॥

અન્તર્યામી ચ વિજ્ઞેયઃ સર્વાન્તઃસ્થશ્ચ રાઘવઃ ।
મૂર્તિરૂપેણ શ્રીરામસ્ત્વર્ચાવતારતાં ગતઃ ॥ ૨૦॥

સંસારિતામવાપ્નોતિ જીવશ્ચાનાદ્યવિદ્યયા ।
શરીરાદેશ્ચ સમ્બન્ધો જીવસંસારિતા મતા ॥ ૨૧॥

પુણ્યપાપાત્મકં કર્મ હ્યવિદ્યા ચાત્ર સમ્મતા ।
તસ્યા નાશં વિના જીવઃ સ્વરૂપં સ્વસ્ય નૈતિ હિ ॥ ૨૨॥

પ્રકૃતિસ્તુ સાવયવા સત્ત્વાદિત્રિગુણાશ્રયઃ ।
ગુણાનાં પ્રલયે સામ્યાત્ તદ્વિકારાઃ સમા મતાઃ ॥ ૨૩॥

સૃષ્ટૌ તુ ગુણવૈષમ્યાદ્ વિકારા વિષમાઃ કિલ ।
પ્રકૃતેર્ગુણવૈષમ્યમીશસ્ય હિ સિસૃક્ષયા ॥ ૨૪॥

ઉક્તા કારણતત્ત્વસ્ય ચાન્યાવસ્થા હિ કાર્યતા ।
કાર્યસ્ય કારણાવસ્થા બુધૈર્નાશઃ પ્રકીર્ત્તિતઃ ॥ ૨૫॥

મૃત્પિણ્ડસ્ય ઘટત્વાપ્તિર્મૃત્પિણ્ડસ્ય હિ કાર્યતા ।
ઘટસ્ય ચૂર્ણતાऽવાપ્તિર્ઘટસ્યૈવં વિનાશિતા ॥ ૨૬॥

ઉત્પત્તિરસતો નાસ્તિ યસ્માદ્ બુધૈર્હિ સમ્મતા ।
સૂક્ષ્મસ્થૂલેશયોસ્તસ્માદદ્વૈતં બ્રહ્મણોઃ ખલુ ॥ ૨૭॥

સર્વેષુ ચ મતેષ્વત્ર નિર્દોષ તત એવ હિ ।
વિશિષ્ટાદ્વૈતમિત્યેવ વૈદિકં યૌક્તિકં મતમ્ ॥ ૨૮।
દેહઃ કરાદિમત્ પિણ્ડં જીવસ્ય પાઞ્ચભૌતિકમ્ ।
તથૈવ ચિદચિન્મિશ્રં જગદ્ બ્રહ્મવપુર્મતમ્ ॥ ૨૯॥

ધાર્યતે પ્રાકૃતો દેહો યથા જીવાત્મસત્તયા ।
બ્રહ્મણઃ સત્તયા તદ્વજ્જગચ્ચૈતદ્ધિ ધાર્યતે ॥ ૩૦॥

“અન્તઃ પ્રવિષ્ટઃ શાસ્તે’તિ શ્રુત્યા જગચ્છરીરકઃ ।
અન્તઃ પ્રવિશ્ય સર્વાત્મા રામઃ સર્વનિયામકઃ ॥ ૩૧॥

કર્માનુસૃત્ય જીવાનાં નિયમનં સ કરોતિ હિ ।
તતો વૈષમ્યનૈર્ઘૃણ્યે ન ચ રામે પરાત્મનિ ॥ ૩૨॥

બાલ્યાદિદેહદોષાશ્ચ મન્યન્તે ન યથાત્મનિ ।
તથૈવ ચિદચિદ્દોષા નાન્તર્યામિણિ રાઘવે ॥ ૩૩॥

તિરોહિતં સ્વરૂપં હિ જીવસ્યાનાદિકર્મણા ।
આવિર્ભૂતસ્વરૂપત્વં કર્મમુક્તસ્ય ચાત્મનઃ ॥ ૩૪॥

આવિર્ભાવઃ સ્વરૂપસ્ય રામસ્યાનુભવસ્તથા ।
મોક્ષા જીવસ્ય વિજ્ઞેયઃ સ ચાપ્રાકૃતધામનિ ॥ ૩૫॥

ભક્ત્યૈવ લભ્યતે મુક્તિરિતિ વેદવિદાં મતમ્ ।
પ્રારબ્ધસ્ય ફલં ભુક્ત્વા ભક્ત્યા કર્મણિ નાશિતે ॥ ૩૬॥

અર્ચિરાદ્યધ્વના જીવો મુક્તિદેશમુપૈતિ હિ ।
ઉપાસનં ચ કૈમર્યં ભક્તિભેદૌ પ્રકીર્તિતૌ ॥ ૩૭॥

અવિચ્છિન્ના હિ રામસ્ય તૈલધારેવ સંસ્મૃતિઃ ।
ઉપાસનતયા બોધ્યા પ્રત્યક્ષસદૃશી ચ સા ॥ ૩૮॥

શ્રીમદ્ભાગવતાનાં ચ ભગવજ્જાનકીપતેઃ ।

આચાર્યાણાં તથા સેવા કૈર્યત્વેન સમ્મતા ॥ ૩૯॥

વિદ્વદ્ભિઃ સમ્મતં ચાત્ર જ્ઞાનમર્થપ્રકાશકમ્ ।
ધર્મધર્મિસ્વરૂપં ચ જ્ઞાનં હિ દ્વિવિધં મતમ્ ॥ ૪૦॥

જ્ઞાનં ધર્મિસ્વરૂપં હિ જીવસ્તથાઽખિલેશ્વરઃ ।
જ્ઞાનં ધર્મસ્વરૂપં હિ નિત્યં પ્રજ્ઞાઽભિધં વિભુ ॥ ૪૧॥

શુદ્ધસત્ત્વાશ્રયો દ્રવ્યં શુદ્ધસત્વં પ્રકીર્ત્તિતમ્ ।
રજસા તમસા હીન સત્વં શુદ્ધતયા મતમ્ ॥ ૪૨॥

ચતુર્વિધાનિ ચૈતાનિ તત્ત્વાનિ ત્વજડાનિ હિ ।
સ્વયમ્પ્રકાશદ્રવ્યં હિ જાડત્વેન સમ્મતમ્ ॥ ૪૩॥

ચતુર્વિંશતિભેદા હિ મૂલાદ્યાઃ પ્રકૃતેર્મતાઃ ।
ઈશ્વરાધિષ્ઠિતા ચેહ કરોતિ પ્રકૃતિર્જગત્ ॥ ૪૪॥

તત્ત્વામૃતમદઃ શ્રીમદનન્તાનન્દશિક્ષિતમ્ ।
પઠતાં મુક્તિદં ભૂયાન્નૃહર્યાનન્દનિર્મિતમ્ ॥ ૪૫॥

ઇતિ જગદ્ગુરુશ્રીનરહર્યાનન્દાચાર્યપ્રણીતં
શ્રીઅનન્તતત્ત્વામૃતં સમ્પૂર્ણમ્ ।

Proofread by Aaditya Kalyanaraman

*Shri Anantatattva Amritam*

pdf was typeset on November 10, 2023

Please send corrections to *sanskrit@cheerful.com*